न्यायमुक्तावली – पेज – 31 28×14×0.1 c.m

चूणामणी कृमाविधुर्वलमीकृतवास्करि: भवोभवन ....

तत्रोत्पादविनाशशालीचतुर्थो समभावशतिकेचित् अत्रधं

79

जंबीरकरवीललनादौ [illegible] म्लादि...
दिमत्त्वमतिरिक्तादिति चेन्न। हरीतक्यादिभक्षणस्य जलरसव्यंजकत्वात्। न च हरीतक्याभिः [illegible] नद्येरम्ला
संयोगस्य संतरोत्पत्तिरिति वाच्यं। कल्पनागौरवात्। पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च ज
ले नाम्लादिकं जंबीररसादौ त्वाश्रयोपाधिकी तथा प्रतीतिः। एवं जन्यशीतस्पर्शजनकतावच्छेदकं
जन्यजलत्वं। तदवच्छिन्नजनकतावच्छेदकं जलत्वं बोध्यं। घृष्टचंदनादौ तु शैत्योपलब्धिश्चंदनांतर्व
र्तिशीततररसजलस्य। तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव तत्र पाकासंभवात्। स्नेह
स्तत्र। द्रवत्वं तु सांसिद्धिकमुदाहृतं। घृतादावपि तदंतर्वर्तिजलस्यैव स्नेहः। जलस्य स्नेहसमवायि
कारणत्वात्। तेन जल एव स्नेह इति मंतव्यं। सांसिद्धिकं द्रवत्वं द्रवत्वव्याप्यजातिविशेषः प्रत्यक्षसि
द्धः। तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः। तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षे
ण च दहनानुकूल्यमिति वक्ष्यते। नित्यतादि प्रथमवत् किंतु देहमयोनिजं। पृथिव्या इवेत्यर्थः। तथाहि।
जलं द्विविधं। नित्यमनित्यं च। परमाणुरूपं नित्यं। द्व्यणुकादि सर्वमनित्यमवयवसमवेतं च। अनित्य
मपि त्रिविधं। शरीरेंद्रियविषयभेदात्। पृथिवीतो यो विशेषस्तमाह। किं त्विति। अयोनिजमेवेत्य
र्थः। जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धं। इंद्रियं रसनं। जलीयमित्यर्थः। तथाहि। रसनं ज
लीयं गंधाद्यव्यंजकत्वे सति रसाभिव्यंजकत्वात्। सक्तुरसाभिव्यंजकोदकवत्। ~~वैयूपनीतशीतस्य~~
~~नयवा। रसनेंद्रियसन्निकर्षव्यभिचारवारणाय [illegible]~~ वायूपनीतशीतनागर
वद्या। रसनेंद्रियसन्निकर्षव्यभिचारवारणाय द्रव्यत्वं देयं। विषयं दर्शयति। सिंधुहिमादिर्विष

नस्यामो ९४ ... नु पृष्ट पत्ते ५ यंजनम हेतुत्व ष्टेति ॥५॥

तमोभावएवतेनः किंनस्यादितितु नसम्यक् ... रनुपपत्तेरिति ... पदम् १=

गुणनिरूपणं ... [illegible]

वैरूप्यकतेजोऽभावेनोपपद्यते द्रव्यान्तरकल्पनायामन्याय्यत्वात्॥ रूपवत्त्वप्रतीतिस्तु भ्रमरूपा॥ कर्मवत्प्रतीतिरपि आलोकापसारणोपाधिकी भ्रान्तैव॥ तमसोऽतिरिक्तत्वेऽनन्तावयवादिकल्पनागौरवं स्यात्॥ सुवर्णस्य यथा तैजसत्वं तथा वक्ष्यते॥ अथ गुणाः रूपं रसो गन्धस्ततः परम्॥३॥ स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम्॥ संयोगश्च विभागश्च परत्वं चापरत्वकम्॥४॥ बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम्॥ द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च॥५॥ एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कण्ठतश्चशब्देन च दर्शिताः॥ तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते॥ कर्माणि विभजते॥ उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा॥ प्रसारणं च गमनं कर्माण्येतानि पञ्च च॥ कर्मत्वजातिः प्रत्यक्षसिद्धा॥ एवमुत्क्षेपणत्वादिकमपि॥ ननु भ्रमणादिकमपि पृथक्कर्माधिकं तथा कुतो नोक्तमत आह॥ भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च॥ तिर्यग्गमनमप्यत्र गमनादेव लभ्यते॥७॥ सामान्यं निरूपयति॥ सामान्यं द्विविधं प्रोक्तं परं चापरमेव च॥ तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम्॥ अनेकसमवेतत्वं संयोगादीनामप्यस्ति अत उक्तं॥ नित्यत्वे सतीति॥ नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमनेकेति॥ नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेप्यस्ति अतो वृत्तिसामान्यं विहाय समवेतत्वमुक्तम्॥ एकमात्रव्यक्तिवृत्तिस्तु न जातिः॥ तथा चोक्तम्॥ व्यक्तेरभेद

धर्मयोः

किरणावल्याम् =१

व्यक्तेरिति एकव्यक्तिकत्वं गगनत्वादेर्जातित्वबाधकं ... तुल्यत्वं तुल्यव्यक्तिकत्वं ... घटत्वकलशत्वादीनां जातीनां भेदे ... जातिसमनियतत्वमिति यावत् ... सङ्करश्च परस्परात्यन्ताभावसमानाधिकरणयोरेकत्र समावेशः ... अनवस्था तु ... जातिमत्त्वे ... रूपहानिः ... सामान्यादेः ... समवायाभावयोर्जातिमत्त्वं नास्ति १=॥=

व

तुलात्वं सङ्करोऽथानवस्थितिः ॥ रूपहानिरसंबन्धो जातिबाधकसङ्ग्रहः ॥ १० ॥ द्रव्यादित्रिकवृत्तिस्तु सत्तापरतयोच्यते ॥ परभिन्ना तु या जातिः सैवापरतयोच्यते ॥ द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ११ ॥ परत्वमधिकदेशवृत्तित्वम् अपरत्वमल्पदेशवृत्तित्वम् ॥ सकलजात्यपेक्षयाधिकदेशवृत्तित्वात्सत्तायाः परत्वम् ॥ तदपेक्षया चान्यासां जातीनामपरत्वम् ॥ व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च ॥ पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात्परत्वम् ॥ सत्तापेक्षया व्याप्यत्वादल्पदेशवृत्तित्वाद्द्रव्यत्वस्यापरत्वम् ॥ विशेषं निरूपयति ॥ अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥ १२ ॥ अन्तेऽवसाने वर्त्तत इत्यन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः ॥ घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः ॥ परमाणूनां परस्परभेदको विशेष एव ॥ स तु स्वत एव व्यावृत्तः ॥ तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः ॥ समवायं दर्शयति ॥ घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ॥ तेषु जातेश्च संबन्धः समवायः प्रकीर्तितः ॥ १३ ॥ अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोः संबन्धः समवायः ॥ समवायत्वं नित्यसंबन्धत्वम् ॥ तत्र प्रमाणं तु यथा ॥ गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसंबन्धविषया ॥ विशिष्टबुद्धित्वात् ॥ दण्डी पुरुष इति विशिष्टबुद्धिवत् ॥ इत्यनुमानेन संयोगादिबाधात्समवायसंबन्धसिद्धिः ॥ न च स्वरूपसंबन्धेन सिद्धसाधनमिति वाच्यं

अयुतसिद्धयोः स्वरूपसंबन्ध
...वदतः परस्यैव विशेषः १=॥=

द्रव्ययोरेव संयोग इति नियमात् अत्र समवायसम्बन्धोऽपि पटत्व... च्छिन्नप्रति... नादात्म्यसम्बन्धेन तन्तुत्वे हेतुत्वात् कार्यतावच्छेदकसम्बन्धविधया समवायसिद्धिः ... समवायस्यानेन स्वरूप... सम्बन्धेन विशेषकार्यकारणभावः ... तत्र च यत्समवेतं कार्यमुत्पद्यते ... स्यादिसमवायिकारणं ... तस्मात् न च यत्सम्बद्धं कार्यमुत्पद्यते तत्समवायिकारणमिति नास्तीति वाच्यम् कपालसम्बन्धे ... ध्वंसे प्रति कपालस्य समवायिकारणत्वप्रसंगात् १=॥=॥=

न्या॰ मु॰
३

6

॥ अनन्तसमवायानां संबन्धत्वकल्पने गौरवात्॥ लाघवादेकसमवायसिद्धिः॥ न च समवायस्यै
कत्वे वायौ रूपवत्त्वबुद्धिस्स्यात्॥ तत्र रूपसमवायसत्त्वेपि रूपाभावात्॥ न चैवमभावस्यापि
वैशिष्ट्यं संबन्धान्तरं सिद्ध्येदिति वाच्यम्॥ तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटा
भाव बुद्धिप्रसंगात्॥ घटाभावस्य तत्र सत्त्वात्॥ तस्य नित्यत्वात्॥ अन्यथा देशान्तरेपि घटा
भावप्रतीतिर्न स्यात्॥ वैशिष्ट्यस्य कल्पने तवैव गौरवम्॥ मम तु घटे पाकरक्ततादशायां
श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः॥ वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यकल्पने तवैव गौर
वम्॥ इत्थं च तत्तत्कालीनतत्तद्भूतलादिकं तत्तदभावानां संबन्धः॥ अभावं विभजते॥ अभाव
स्तु द्विधा संसर्गान्योन्याभावभेदतः॥ अभावत्वं द्रव्यादिषट्कान्योन्याभावं भेदादित्यर्थः॥ अन्यो
न्याभावस्यैकविधत्वात्तद्विभागाभावात्संसर्गाभावं विभजते॥ प्रागभावस्तथाध्वंसोप्यत्यन्ता
भावउच्यते॥ १२॥ एवं त्रैविध्यमापन्नः संसर्गाभाव उच्यते॥ संसर्गाभावत्वमन्योन्याभावभिन्नाभाव
त्वम्। अन्योन्याभावत्वं तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वम्॥ विनाश्यभावत्वं प्रा
गभावत्वम्॥ जन्याभावत्वं ध्वंसत्वम्॥ नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्॥ यत्र तु भूतलादेर्घ
टादिकमपसारितं पुनरानीतं च तत्र घटकालस्य संबन्धाघटकत्वादत्यन्ताभावस्य नित्यत्वेपि घ
टकाले न घटात्यन्ताभावबुद्धिः॥ तत्रोत्पादविनाशशाली चतुर्थोयमभाव इति केचित्॥ अत्रेदं

वैशिष्ट्यस्य तत्र सत्ता
त् ५

वत्वं
संस[illegible]संसर्गा
भावान्योन्याभा
व[illegible] ८५

सप्रागभावाधिकरणे नात्यन्ताभाव इति प्राचां मतम्॥ यथा मद्वृहे रक्तो नास्ति रक्तघटे श्यामो ना
स्तीति धीः प्रागभावध्वंसावादाय इति॥ न तु तदत्यन्ताभावम्॥ तयोर्विरोधात्॥ नव्यास्तु तत्र विरो
धे मानाभावात्॥ ध्वंसादिकालावच्छेदेनात्यन्ताभावोऽवर्तत इत्याहुः॥ नन्वत्यन्ताभावानामधिकर
णात्मकत्वे लाघवादिति चेन्न॥ अनन्ताधिकरणात्मकत्वकल्पनापेक्षया अतिरिक्तकल्पनाया
एव लघीयस्त्वात्॥ एवञ्चाधाराधेयभावोऽप्युपपद्यते॥ एवं [illegible] तत्तद्घटगन्धरसाद्यभावानां प्रत्य
क्षत्वमुपपद्यते॥ अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् प्रत्यक्षत्वं स्यात्॥ एतेन ज्ञा
नविशेषकालादिविशेषात्मकत्वमभावस्येति प्रत्युक्तम् अप्रत्यक्षत्वापत्तेः॥ इदानीं पदार्थानां साधर्म्य
वैधर्म्यं वक्तुं प्रक्रमते॥ सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते॥ १३॥ समानो धर्मो येषां ते स
धर्माणः तेषां भावः साधर्म्यं समानो धर्म इति फलितोऽर्थः॥ एवं विरुद्धो धर्मो येषां ते विरुद्धध
र्माणः तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फलितोऽर्थः॥ ज्ञेयत्वं ज्ञानविषयता॥ सा च सर्वत्रै
वास्ति ईश्वरज्ञानविषयताया [illegible]॥ एवमभिधेयत्वप्रमेयत्वादिकं बोध्य
म्॥ द्रव्यादयः पञ्च भावा अनेके समवायिनः॥ द्रव्यगुणकर्मसामान्यविशेषाणां साध
र्म्यमनेकत्वं समवायित्वं [illegible] तथाप्यनेकत्वे सति भावत्वम्
तथा चानेकभावत्वमिति [illegible] मत्त्वमिति फलितोऽर्थः तेन प्रत्येकं ह

[illegible]

शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः [illegible]
शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः अत्र सर्वत्र प्रत्यक्षे लौकिकं
ग्राह्यं वक्ष्यमाणमलौकिकं प्रत्यक्षं इंद्रियसंयोगादिविनापि जायते एवमात्मप्रत्यक्षे म
नःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः कारणं आत्मसमवे
तसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः अभावप्रत्यक्षे सम[illegible]
प्रत त्यक्षे चेंद्रियसंबद्धविशेषणताहेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः अत्र यद्यपि विशे
षणता नानाविधा तथापि भूतलादौ घटाद्यभावः संयुक्तविशेषणतया तत्र गृह्यते संख्या
दौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यात्वादौ रूपाद्यभाव संयुक्तसमवे
तसमवेतविशेषणतया शब्दाभावः केवल[illegible]श्रोत्रावच्छिन्नविशेषणतया कादौ खत्वा
द्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया शब्दे कत्वादौ खत्वाद्यभावः श्रोत्रावच्छिन्न
समवेतसमवेतविशेषणतया एवं कत्वावच्छिन्नाभावखत्वाभावादिविशेषणे विशेषणत
वेत

एवं कत्वादौ खत्वा
द्यभावः श्रोत्रा
वच्छिन्नसमवेत
[illegible]णतया॥

॥संबंधप्रत्यक्षे
यावदाश्रयप्र
त्यक्षस्य हेतु
त्वादिति भाव

सन्निकर्षइति॥२

यां घटाभावादौ पटाद्यभावः संयुक्तविशेषणविशेषणतया एवमन्यदप्यूह्यं तथा
पि विशेषणतावैव सा गृह्यते अन्यथा घाटाप्रत्यक्षापत्तिरिति प्राचां प्रवादो व्याहन्येते
ति यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते। प्रत्यक्षं समवायस्य विशेषणतया भवेत् अभा
वप्रत्यक्षे योग्यानुपलब्धिः कारणं तथाहि भूतलादौ घटादिज्ञाने घटाभावादिकं न ज्ञायते
तेनाभावोपलंभे प्रतियोग्युपलंभाभावः कारणं तत्र योग्यताप्यपेक्षिता सा च प्रतियोगि
सत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्र
संजितं तदुपलंभरूपः प्रतियोगी यस्य स तदुपलंभाभावोऽभावप्रत्यक्षे हेतुः तथाहि यत्रालोकसं
योगादिकं वर्त्तते तत्र यद्यत्र घटः स्यात्तर्ह्युपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभावादिप्रत्य
क्षं भवति अंधकारे ~~संयोगादिकं वर्त्तते तत्र यद्यत्र घटः स्यात्तर्ह्युपलभ्येतेत्यापादयितुं शक्यते~~
कारे तु नापादयितुं शक्यते तेन घटाभावादेरंधकारे चाक्षुषप्रत्यक्षं न स्पार्शनप्रत्यक्षं तु भव
त्येव आलोकसंबंधं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात् गुरुत्वादिकं तु य

आरोप

आरोपेण॥